# Shri Raghavendra Hridayam

# શ્રીરાઘવેન્દ્રહૃદયમ્

## Document Information

Text title : Shri Raghavendra Hridayam

File name : rAghavendrahRRidayam.itx

Category : deities_misc, gurudev, hRidaya

Location : doc_deities_misc

Author : Krishna Avadhutapandita Vedavyasacharya

Proofread by : Gopalakrishnan, PSA Easwaran

Description/comments : from Raghavendra Tantram

Latest update : December 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2021

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્રહૃદયમ્

નારાયણં મહાલક્ષ્મીં ભાર્ગવં રઘુનાયકમ્ ।
કૃષ્ણં વ્યાસં હનૂમન્તં ભીમં મધ્વં ગુરૂનપિ ॥ ૧॥

વ્યાસં નત્વાઽવધૂતોઽહં વક્ષ્યામિ હૃદયં ગુરોઃ ।
નાનાછન્દઃ સુસર્વાર્થદાયકં પાપનાશકમ્ ॥ ૨॥

ધ્યાયામિ શ્રીરાઘવેન્દ્રાર્યરૂપં
ભૂલોકેઽસ્મિન્ સર્વસૌભાગ્યહેતુમ્ ।
ભક્તત્રાણાયૈવ બદ્ધાદરં મે
ચિત્તે નિત્યં સંવસત્વિષ્ટદૈવમ્ ॥ ૩॥

પુરા પ્રહ્લાદનામાઽભૂત્ હિરણ્યકશિપોઃ સુતઃ ।
યદર્થં શ્રીમહાવિષ્ણુર્નૃકણ્ઠીરવતાં ગતઃ ॥ ૪॥

સંહતઃ પ્રહતશ્ચેતિ તસ્યાસ્તાં પરિચારિણૌ ।
ત્રેતાયાં રામસેવાર્થં વિભીષણતયાઽજનિ ॥ ૫॥

તત્રાપિ ચારૌ તૌ જાતૌ સન્ધિકશ્ચ પ્રસન્ધિકઃ ।
દ્વાપરેઽપિ સમં તાભ્યાં સમાવિષ્ટશ્ચ વાયુના ॥ ૬॥

ભૂભારક્ષપણે વિષ્ણોરઙ્ગતામાપ્તુમેવ સઃ ।
પ્રતીપપુત્રતામાપ્ય બાહ્લીકેષ્વભવત્પતિઃ ॥ ૭॥

કલૌ ગોપાલકૃષ્ણાર્ચાં પૂજાયૈ વ્યાસમસ્કરી ।
ભૂત્વા નિર્જિત્ય દુર્વાદાન્ મધ્વશાસ્ત્રં પ્રકાશયત્ ॥ ૮॥

બ્રહ્મમાનસપૂજાયામાવિર્ભૂતાં હૃદમ્બુજાત્ ।
શ્રીરામાર્ચં ચ સીતાર્ચ્યાં પ્રપૂજયિષુરેષકઃ ॥ ૯॥

શ્રીરાઘવેન્દ્રતીર્થાખ્યોઽવતીર્ય યતિરૂપતઃ ।
વિવૃત્યા મધ્વશાસ્ત્રસ્ય લોકોપકૃતિમાતનોત્ ॥ ૧૦॥

અપ્પણાચાર્ય કૃષ્ણાખ્યૌ તત્રાપિ દ્વિજરૂપતઃ ।
સંહતાહતૌ જાતૌ શિષ્યૌ તસ્ય પ્રિયૌ સદા ॥ ૧૧॥

પુનશ્ચ સત્યસન્ધાખ્યો મઠાન્તરનિવાસિનીમ્ ।
અનર્ચિતાં ચ સીતાયાઃ પ્રતિમામાર્ચયદ્યતિઃ ॥ ૧૨॥

વિષ્વક્સેનાહીશપુત્રાવતારાઃ ષડિમે મતાઃ ।
તસ્ય શ્રીરાઘવેન્દ્રગુરોઃ કામ્યાર્થદાયિનઃ ॥ ૧૩॥

અપ્પણાચાર્યરચિતં સ્તોત્રં સર્વેષ્ટસાધકમ્ ।
એતદ્વિના ગુરોઃ પૂજા સ્તોત્રઞ્ચાષ્ટાક્ષરી જપઃ ॥ ૧૪॥

સેવા ચ વ્યર્થતામેતિ ન પ્રસાદો ગુરોર્ભવેત્ ।
આદૌ સકૃદ્વા તત્પાઠાદન્યત્સિદ્ધ્યતિ શીઘ્રતઃ ॥ ૧૫॥

સર્વેષ્વપિ ચ શિષ્યેષુ અપ્પણાચાર્ય એવ સઃ ।
ગુરોરતિપ્રિયો યસ્માત્ સ્તુતિસ્તેન સમાદૃતાઃ ॥ ૧૬॥

અપ્પણાચાર્યસમ્પ્રોક્તં મૂલં માલા ચ વર્મ ચ ।
યથાયોગં યથાકાલં તત્તદુક્તાર્થસિદ્ધિદમ્ ॥ ૧૭॥

શ્રીરાઘવેન્દ્રયતિનં ઈપ્સિતાર્થપ્રદાયિનમ્ ।
ઉપાસતે યથા ભક્ત્યા તથા ફલમવાપ્નુયાત્ ॥ ૧૮॥

સેવયા પરમહંસાનામૈહિકાડમુષ્ટિકં ભવેત્ ।
જ્ઞાનં ભક્તિં ચ વૈરાગ્યં ભુક્તિં મુક્તિં ચ વિન્દતિ ॥ ૧૯॥

ઇત્યાદિ વાક્યાત્ પરમહંસાધીશમિમં ગુરુમ્ ।
સેવેત સર્વથા મર્ત્યઃ સ્વરૂપોદ્ધારકારણમ્ ॥ ૨૦॥

સ્તુવીત બહુભિઃ સ્તોત્રૈઃ પ્રાર્થયીત યથેપ્સિતમ્ ।
શ્રીરાઘવેન્દ્રં શ્રિતપારિજાતં સીતારઘૂત્તંસપદાબ્જચિત્તમ્ ।
કાષાયવસ્ત્રં કમનીયવેષં કામ્યાર્થદાતારમતીતદોષમ્ ॥ ૨૧॥

જયતુ જયતુ રાજા રાજરાજાદિપૂજ્યો
જયતુ જયતુ રમ્યે રઞ્જિતાનેકલોકઃ ।
જયતુ જયતુ ભોગી ભક્તભાગ્યપ્રદાતા
જયતુ જયતુ ભૂમા ભૂરિ ભૂરિ પ્રદાતા ॥ ૨૨॥

જયતુ જયતુ બન્ધુર્બન્ધનચ્છેદકારી

જયતુ જયતુ મિત્રં મીલિતાનેકવૈરી ।
જયતુ જયતુ માતા માન્યમાન્યો મહાત્મા
જયતુ જયતુ તાતસ્તાપહર્તા નિતાન્તમ્ ॥ ૨૩॥

ગુરો તવ પદામ્બુજં ભવપયોધિનૌકાયિતં
મહાજનપરમ્પરાભજનગોચરં ભૂતિદમ્ ।
ભજામિ ભજતાં નૃણાં બહુગદૌઘવિધ્વંસકં
સુખપ્રદમહર્નિશં સુખસુખેન સંસિદ્ધિદમ્ ॥ ૨૪॥

મનો વસતુ પાદયોર્ભવતુ મે વચસ્તે સ્તુતૌ
ત્વદીક્ષણવિધૌ દૃશા ભવતુ તેઽર્ચનાયાં કરૌ ।
શ્રુતી તવ ગુણશ્રુતૌ ભવતુ મસ્તકં તે નતૌ
પ્રદક્ષિણવિધૌ પદે ગુરુવરાશ્રયે તે પદે ॥ ૨૫॥

વિત્તાશયા જગતિ વિત્તાદિ સમ્પદતિમત્તાનિમાનુપચરન્
ન્યાત્તાદિરસ્મ્યહમનુત્તાનલુણ્ઠદપચિત્તાવિવેકમતિમાન્ ।
મત્તાઙ્ગના કઠિનવૃત્તાનુબન્ધિકુચદત્તાધરશ્ચ તમિમં
શ્રીરાઘવેન્દ્ર દયયાઽઽરાદુપૈહિ મમ ધીરાશુ યચ્છ સુમતિમ્ ॥ ૨૬॥

તવ સેવારતાન્ કાંશ્ચિત્ ભક્તાન્ પ્રેષયા માં પ્રતિ ।
તેષાં મનોરથં તાત મયા પુત્રેણ પૂરય ॥ ૨૭॥

અથવા કરુણાસિન્ધો મયિ સન્નિહિતઃ સદા ।
પુત્રસ્ય મમ વાક્યેન સર્વસર્વેષ્ટદો ભવ ॥ ૨૮॥

યેનકેનાપ્યુપાયેન દૂને દુર્યશસા ભુવિ ।
માહાત્મ્યં મયિ વિન્યસ્ય કુરુ માં લોકપૂજિતમ્ ॥ ૨૯॥

યુક્તાયુક્તમજાનાનો યાચે ત્વાં બાલવદ્ગુરો ।
દાતા ત્રાતા દયાલુસ્ત્વં યથેચ્છસિ તથા કુરુ ॥ ૩૦॥

સર્વજ્ઞાય સ્વતન્ત્રાય ભક્તક્લેશવિનાશિને ।
ઉદારચેતસે કિં તે વદે મદ્ભારવાહિને ॥ ૩૧॥

આપાદમૌલિપર્યન્તં ગુરૂણામાકૃતિં સ્મરેત્ ।
તેન વિઘ્નાઃ પ્રણશ્યન્તિ સિદ્ધ્યન્તિ ચ મનોરથાઃ ॥ ૩૨॥

ઇતિ શ્રી ગુરુરાજસ્ય હૃદયં તદનુજ્ઞયા ।
કૃષ્ણાવધૂત કથિતં ગુરુવાક્યાનુસારતઃ ।

સમ્પાદ્ય સિદ્ધસઙ્કલ્પે ભક્તિં મુક્તિં ચ વિન્દતિ ॥ ૩૩॥

પઠનાચ્છ્રવણાદ્વાપિ ગુરુસાન્નિધ્યકારણમ્ ।
કિમત્રબહુના સર્વં ગુરુરાજપ્રસાદતઃ ॥ ૩૪॥

મોદં મે દિશતુ ગુરુઃ સ રાઘવેન્દ્રો
    દીનાનાં શરણમુદારચિત્તવૃત્તિઃ ।
ભક્તાનાં હરિગુરુરૂપદર્શકસ્ત્વં
    સુપ્રેમ્ણા મયિ મમ તાત સન્નિધેહિ ॥ ૩૫॥

ઇતિ શ્રીમત્કૃષ્ણાવધૂતપણ્ડિતકૃતૌ શ્રીરાઘવેન્દ્રતન્ત્રે
    પ્રત્યક્ષસિદ્ધિદે શ્રીરાઘવેન્દ્રહૃદયં નામ તૃતીયઃ પટલઃ ।

Proofread by Gopalakrishnan, PSA Easwaran

---

*Shri Raghavendra Hridayam*
pdf was typeset on December 18, 2021

Please send corrections to *sanskrit@cheerful.com*